# ॥ रोगनिवारणश्लोकाः ॥

ममोपात्त- + श्री-परमेश्वर-प्रीत्यर्थं
ज्वर-औपसर्गिकादि-नानाविध-साङ्क्रामिक-रोगाणाम् उन्मूलनार्थम्
आरोग्य-प्राप्त्यर्थम् अस्मद्देशीयानां विदेशीयानां चापि सर्वेषां
व्याधि-भय-निवृत्त्यर्थं सर्वलोकक्षेमार्थं रोगनिवारक-भगवन्नाम-स्तोत्र-पारायणं
करिष्ये ।

अच्युतानन्तगोविन्द-नामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥

शरीरे जर्जरीभूते व्याधिग्रस्ते कलेवरे।
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥

सुमीनाक्षिपते शम्भो सोमसुन्दरनायक।
इमाम् आपदमुत्पन्नां मदीयां नाशय प्रभो ॥

आर्ता विषण्णाः शिथिलाश्च भीताः
घोरेषु च व्याधिषु वर्तमानाः।
सङ्कीर्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवन्ति ॥

बालाम्बिकेश वैद्येश भवरोगहरेति च।
जपेन्नामत्रयं नित्यं महारोगनिवारणम् ॥

पञ्चापगेश जप्येश प्रणतार्तिहरेति च।
जपेन्नामत्रयं नित्यं पुनर्जन्म न विद्यते ॥

अपस्मारकुष्ठक्षयार्शः-प्रमेह-
ज्वरोन्मादगुल्मादिरोगा महान्तः।
पिशाचाश्च सर्वे भवत्पत्रभूतिं
विलोक्य क्षणात् तारकारे द्रवन्ते॥

किरन्तीमङ्गेभ्यः किरणनिकुरुम्बामृतरसं
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधारसिरया॥

मृगाः पक्षिणो दंशका ये च दुष्टाः
तथा व्याधयो बाधका ये मदङ्गे।
भवच्छक्तितीक्ष्णाग्रभिन्नाः सुदूरे
विनश्यन्तु ते चूर्णितक्रौञ्चशैल॥

## ॥ क्रिमि-नाशन-मन्त्राः ॥

(तैत्तिरीयारण्यकम्/प्रपाठकः – ४/अनुवाकाः ३६–४०)

अत्रिणा त्वा क्रिमे हन्मि। कण्वेन जमदग्निना। विश्वावसोर्ब्रह्मणा हतः। क्रिमीणाꣳ राजा। अप्येषाꣳ स्थपतिर्हतः। अथो माताऽथो पिता। अथो स्थूरा अथो क्षुद्राः। अथो कृष्णा अथो श्वेताः। अथो आशातिका हताः। श्वेताभिः सह सर्वे हताः॥७७॥

आहरावद्य। शृतस्य हविषो यथा। तत्सत्यम्। यदमुं यमस्य जम्भयोः। आदधामि तथा हि तत्। खण्फण्म्रसि॥७८॥

ब्रह्मणा त्वा शपामि। ब्रह्मणस्त्वा शपथेन शपामि। घोरेण त्वा भृगूणां चक्षुषा प्रेक्षे। रौद्रेण त्वाङ्गिरसां मनसा ध्यायामि। अघस्य त्वा धारया

वि॒द्ध्यामि। अध॑रो॒ मत्प॑द्यस्वासौ॥७९॥

उत्तु॑द शिमिजावरि। तल्पे॑जे॒ तल्प॒ उत्तु॑द। गि॒रीꣳ रनु॒ प्रवे॑शय। मरी॑ची॒रुप॒
सन्नु॑द। याव॑दि॒तः पु॒रस्ता॑दु॒दया॑ति॒ सूर्यः॑। ताव॑दि॒तो॑ऽमुं ना॑शय।
यो᳚ऽस्मान्द्वेष्टि॑। यं च॑ व॒यं द्वि॒ष्मः॥८०॥

भूर्भुव॒ः सुवो॒ भूर्भुव॒ः सुवो॒ भूर्भुव॒ः सुव॑ः। भुवो᳚ऽद्धायि॒ भुवो᳚ऽद्धायि॒
भुवो᳚ऽद्धायि। नृ॒म्णायि नृ॒म्णं नृ॒म्णायि नृ॒म्णं नृ॒म्णायि नृ॒म्णम्। नि॒धाय्यो॑
वायि नि॒धाय्यो॑ वायि नि॒धाय्यो॑ वायि। ए अ॒स्मे अ॒स्मे। सुव॒र्न
ज्यो᳚तीः॥८१॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Roga_Nivarana_Shloka.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits